शश्वत् ४ असकृत् ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णम् ८ प्रतिक्षणम् ९ । इति शब्दरत्नावली ॥

पौनर्भवः, पुं, (पुनर्भुवोऽपत्यमिति । पुनर्भू+"शृष्यानन्तर्य्ये विदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः । इति जटाधरः ॥ पुनर्भूपुत्त्र. । स तु भर्तृपरित्यक्तविधवयोरन्येनोत्पादितः । तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥"

इति मानवे । ९ । १७५ ॥

"येति । या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्य्या भूत्वा यमुत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्त्र उच्यते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥ भर्तृविशेषः । अक्षतयोन्योर्भर्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमुत्सृज्यान्यमाश्रित्यपुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा ।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ॥"

इति मानवे । ९ । १७६ ॥

"सा चेदिति । सा स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्व्विवाहाख्यं संस्कारमर्हति । यद्वा कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्व्विवाहाख्यं संस्कारमर्हति ।" इति तट्टीकायां कुल्लूकभट्टः॥*॥ कन्याविशेषे, स्त्री । सप्तविधपौनर्भवाः कन्या वर्ज्जनीयाः । यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रभवा च या ।
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत् ॥
कृतकौतुकमङ्गला बद्धकङ्कणा । उदकस्पर्शिता उदकपूर्व्वं दत्तेति रत्नाकरः ।" इत्युद्वाहतत्त्वम् ॥

पौरं, क्ली, (पुरे भवम् । पुर+"तत्र भवः ।" ४ । ३ । ५३ । इत्यण् ।) रोहिषतृणम् । इत्यमरः । २ । ४ । १६६ ॥ रामकर्पूर इति ख्यातम् ॥ (अस्य पर्य्यायो यथा,—

"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा ।
भूतीकं व्यासपौरञ्च श्यामकं धूमगन्धिकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पुरोद्भूते, त्रि । इति मेदिनी ॥ (यथा, रघुः ।६।८५।

"इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥"

पुं, पुरुराजपुत्त्रः । यथा, ऋग्वेदे । ८ । ३ । १२ ।

"शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।"

पुरः पूरक एव । स्वार्थे अण् । उदरपूरके, त्रि । यथा, तत्रैव । २ । ११ । ११ ।

"पृणन्तस्ते कुक्षी वर्द्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥")

पौरकः, पुं, (पौर इव कायतीति । कै+कः ।) गृहबाह्योपवनम् । यथा,—

"निष्कुटस्तु गृहारामो बाह्यारामस्तु पौरकः ॥"

इति हेमचन्द्रः । ४ ।१७८ ॥

पौरवः, पुं, (पुरोरपत्यमिति । पुरु+अण् ।) पुरुवंशः । यथा,—

"द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः ।
पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ! ॥"

इति मात्स्ये ३४ अध्यायः ॥

(देशविशेषः । यथा, मार्कण्डेये । ५८ । ५२ ।

"त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ! ।
पूर्व्वोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः ॥"

पुरुवंशीये, त्रि ॥ (यथा, शकुन्तलायां प्रथमे अङ्के ।

"कः पौरवे वसुमतीं शासति शासितरि दुर्व्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु ॥")

पौरस्त्यः, त्रि, (पुरो भवः । पुरस्+"दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ९८ । इति त्यक् ।) प्रथमः । इत्यमरः । ३ । १ । ८० ॥ (पूर्व्वदिग्भवः । यथा, रघुः । ४ । ३४ ।

"पौरस्त्यानेवमाक्रामन् तान् तान् जनपदान् जयी ॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा । पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पुराणवेत्ता । इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते । १ । ४ । १ । "लोमहर्षणपुत्त्र उग्रश्रवाः सौतिः पौराणिको शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे ॥" यथा च भागवते । १२ । ७ । ५ ।

"त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ।
वैशम्पायनहारीतौ षड्वै पौराणिका इमे ॥")

पौरुषं, क्ली, (पुरुष+अण् ।) पुरुषस्य भावः । पुरुषस्य कर्म्म । पुरुषस्य तेजः । इति मेदिनी ॥

"क्लीवा हि दैवमेवैकं प्रशंसन्ति न पौरुषम् ।
दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः ॥"

इत्यग्निपुराणम् ॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥"

इति हितोपदेशः ॥

पौरुषं, त्रि, (पुरुष+अण् ।) ऊर्द्धविस्तृतदोःपाणिनृमाणम् । पुरुषपरिमाणम् । इत्यमरः । ३ । ३ । २२२ ॥ (पुरुषवाह्यः । यथा, मनुः । ८ । ४०४ ।

"पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे ॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ ।" ५ । १ । १० । इत्यत्र "पुरुषाद्वधविकारसमूहतेन कृतेषु" एष्वर्थेषु ढञ् ।) समूहः । (यथा, माघः । २ । ४ ।

"एकाकिनोऽपि परितः पौरुषेयवृता इव ॥")

वधः । पुरुषस्य पदान्तरम् । इति मेदिनी ॥

पौरुषेयः, त्रि, (पुरुष+ढञ् ।) पुरुषकृतः । पुरुषविकारः । इति मेदिनी ॥ (पुरुषसम्बन्धिनि । यथा, ऋग्वेदे । १० । ८७ । १६ ।

"यः पौरुषेयेण क्रविषा समंक्ते ।")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्नेत्रं यस्येति । पुरोगुः । ततः प्रज्ञाद्यण् ।) पाकशालाध्यक्षः । इत्यमरः ।२।९।२७। (यथा, हरिवंशे ।१४६।५८।

"दृष्ट्वाश्वसौवर्चलयुक्तपूर्णान्
पौरोगवोक्तानुपजह्रुरेषाम् ॥")

पौरोडाशः, पुं, (पुरोडाश एव । प्रज्ञाद्यण् ।) पुरोडाशः । पुरोडाशसहचरितो मन्त्रः । इति सिद्धान्तकौमुदी ॥

पौरोडाशिकः, पुं, (पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः । तस्य व्याख्यानस्तत्र भवो वा । "पौरोडाश-पुरोडाशात् ष्ठन् ।" ४ । ३ । ७० । इति ष्ठन् ।) पुरोडाशिकः । इति सिद्धान्तकौमुदी ॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः । पौर्णमासी+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४ । ३ । १६ । इत्यण् ।) यागविशेषः । इत्यमरः । २ । ७ । ४८ ॥ (यथा, मनुः । ४ । २५ ।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि ॥")

तथा हि । अमावस्यायां अमावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मस्वरूपज्ञापकयोरुत्पत्तिश्रुतीः समामनन्ति । यथा । आग्नेयाष्टाकपालोऽमावस्यायां पौर्णमास्याञ्चाच्युतो भवति । उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि भवत्यमावास्यायामैन्द्रं पयो भवत्यमावास्यायामिति । ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम् । तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालास्त्रयः पौर्णमास्याम् । आग्नेयाष्टाकपालैन्द्रदधियागैन्द्रपयोयागास्त्रयोऽमावास्यायामित्यर्थः । आसु श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिपत्सहिततदुभयपराणि । तत्र पूर्व्वयोर्यागारम्भः प्रतिपदोर्यागः । तथा च द्वे ह वै पौर्णमास्यौ द्वे अमावास्ये तस्मात् प्रतिपद्युपवसन् यजेतापरेद्युरिति श्रुतिः । अस्यार्थः । यावज्जीविकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोर्व्विकृतिभूतौ दर्शपौर्णमासौ कौण्डपायिनामयनीयौ पञ्चादौ कर्त्तव्यौ ।" इति मलमासतत्त्वम् ॥

पौर्णमासी, स्त्री, (पूर्णो माासोऽस्यां वर्त्तते इति । पूर्णमासादण् वक्तव्य इत्यण् । ततो ङीप् ।) पूर्णिमा । इत्यमरः । १ । ४ । ७ ॥